कौटिलीयम् अर्थशास्त्रम्

विनयाधिकारिकम्—प्रथममधिकरणम्

१

[प्रकरणाधिकरणसमुद्देशः]

ॐ नमः शुक्रबृहस्पतिभ्याम् ।

पृथिव्या लाभे पालने च यावन्त्यर्थशास्त्राणि पूर्वाचार्यैः प्रस्थापितानि प्रायशस्तानि संहृत्यैकमिदमर्थशास्त्रं कृतम् । १ ।

तस्यायं प्रकरणाधिकरणसमुद्देशः । २ ।

विद्यासमुद्देशः, वृद्धसंयोगः, इन्द्रियजयः, अमात्योत्पत्तिः, मन्त्रिपुरोहितोत्पत्तिः, उपधाभिः शौचाशौचज्ञानममात्यानाम्, गूढपुरुषोत्पत्तिः, गूढपुरुषप्रणिधिः, स्वविषये कृत्याकृत्यपक्षरक्षणम्, परविषये कृत्याकृत्यपक्षोपग्रहः, मन्त्राधिकारः, दूतप्रणिधिः, राजपुत्ररक्षणम्, अपरुद्धवृत्तम्, अपरुद्धे वृत्तिः, राजप्रणिधिः, निशान्तप्रणिधिः, आत्मरक्षितकम्—इति विनयाधिकारिकं प्रथममधिकरणम् । ३ ।

जनपदनिवेशः, भूमिच्छिद्रापिधानम्, दुर्गविधानम्, दुर्गनिवेशः, संनिधातृनिचयकर्म, समाहर्तृसमुदयप्रस्थापनम्, अक्षपटले गाणनिक्याधिकारः, समुदयस्य युक्तापहृतस्य प्रत्यानयनम्, उपयुक्तपरीक्षा, शासनाधिकारः, कोशप्रवेश्यरत्नपरीक्षा, आकरकर्मान्तप्रवर्तनम्, अक्षशालायां सुवर्णाध्यक्षः, विशिखायां सौवर्णिकप्रचारः, कोष्ठागाराध्यक्षः, पण्याध्यक्षः, कुप्याध्यक्षः, आयुधागाराध्यक्षः, तुलामानपौतवम्, देशकालमानम्, शुल्काध्यक्षः, सूत्राध्यक्षः, सीताध्यक्षः, सुराध्यक्षः, सूनाध्यक्षः, गणिकाध्यक्षः, नावध्यक्षः, गोऽध्यक्षः, अश्वाध्यक्षः, हस्त्यध्यक्षः, रथाध्यक्षः, पत्त्यध्यक्षः, सेनापतिप्रचारः, मुद्राध्यक्षः, विवीताध्यक्षः, समाहर्तृप्रचारः, गृहपतिकवैदेहकतापसव्यञ्जनाः प्रणिधयः, नागरिकप्रणिधिः—इत्यध्यक्षप्रचारो द्वितीयमधिकरणम् । ४ ।

व्यवहारस्थापना, विवादपदनिबन्धः, विवाहसंयुक्तम्, दायविभागः, वास्तुकम्, समयस्यानपाकर्म, ऋणादानम्, औपनिधिकम्, दासकर्मकरकल्पः, संभूयसमुत्थानम्, विक्रीतक्रीतानुशयः, दत्तस्यानपाकर्म, अस्वामिविक्रयः, स्वस्वामिसंबन्धः, साहसम्, वाक्पारुष्यम्, दण्डपारुष्यम्, द्यूतसमाह्वयम्, प्रकीर्णकम्—इति धर्मस्थीयं तृतीयमधिकरणम् । ५ ।

कारुकरक्षणम्, वैदेहकरक्षणम्, उपनिपातप्रतीकारः, गूढाजीविनां रक्षा, सिद्धव्यञ्जनैर्माणवप्रकाशनम्, शङ्कारूपकर्माभिग्रहः, आशुमृतकपरीक्षा, वाक्यकर्मानुयोगः,

Scanned with CamScanner

सर्वाधिकरणरक्षणम्, एकाङ्गवधनिष्क्रयः, शुद्धश्चित्रश्च दण्डकल्पः, कन्याप्रकर्म, अतिचारदण्डाः—इति कण्टकशोधनं चतुर्थमधिकरणम् । ६ ।

दाण्डकर्मिकम्, कोशाभिसंहरणम्, भृत्यभरणीयम्, अनुजीविवृत्तम्, समयाचारिकम्, राज्यप्रतिसंधानम्, एकैश्वर्यम्—इति योगवृत्तं पञ्चममधिकरणम् । ७ ।

प्रकृतिसंपदः, शमव्यायामिकम्—इति मण्डलयोनिः षष्ठमधिकरणम् । ८ ।

षाड्गुण्यसमुद्देशः, क्षयस्थानवृद्धिनिश्चयः, संश्रयवृत्तिः, समहीनज्यायसां गुणाभिनिवेशः, हीनसंधयः, विगृह्यासनम्, संधायासनम्, विगृह्य यानम्, संधाय यानम्, संभूय प्रयाणम्, यातव्यामित्रयोरभिग्रहचिन्ता, क्षयलोभविरागहेतवः प्रकृतीनाम्, सामवायिकविपरिमर्शः, संहितप्रयाणिकम्, परिपणितापरिपणितापसृताः संधयः, द्वैधीभाविकाः संधिविक्रमाः, यातव्यवृत्तिः, अनुग्राह्यमित्रविशेषाः, मित्रहिरण्यभूमिकर्मसंधयः, पार्ष्णिग्राहचिन्ता, हीनशक्तिपूरणम्, बलवता विगृह्योपरोधहेतवः, दण्डोपनतवृत्तम्, दण्डोपनायिवृत्तम्, संधिकर्म, समाधिमोक्षः, मध्यमचरितम्, उदासीनचरितम्, मण्डलचरितम्—इति षाड्गुण्यं सप्तममधिकरणम् । ९ ।

प्रकृतिव्यसनवर्गः, राजराज्ययोर्व्यसनचिन्ता, पुरुषव्यसनवर्गः, पीडनवर्गः, स्तम्भवर्गः, कोशसङ्गवर्गः, बलव्यसनवर्गः, मित्रव्यसनवर्गः—इति व्यसनाधिकारिकमष्टममधिकरणम् । १० ।

शक्तिदेशकालबलाबलज्ञानम्, यात्राकालाः, बलोपादानकालाः, संनाहगुणाः, प्रतिबलकर्म, पश्चात्कोपचिन्ता, बाह्याभ्यन्तरप्रकृतिकोपप्रतीकाराः, क्षयव्ययलाभविपरिमर्शः, बाह्याभ्यन्तराश्चापदः, दूष्यशत्रुसंयुक्ताः, अर्थानर्थसंशययुक्ताः, तासामुपायविकल्पजाः सिद्धयः—इत्यभियास्यत्कर्म नवममधिकरणम् । ११ ।

स्कन्धावारनिवेशः, स्कन्धावारप्रयाणम्, बलव्यसनावस्कन्दकालरक्षणम्, कूटयुद्धविकल्पाः, स्वसैन्योत्साहनम्, स्वबलान्यबलव्यायोगः, युद्धभूमयः, पत्त्यश्वरथहस्तिकर्माणि, पक्षकक्षोरस्यानां बलाग्रतो व्यूहविभागः, सारफल्गुबलविभागः, पत्त्यश्वरथहस्तियुद्धानि, दण्डभोगमण्डलासंहतव्यूहव्यूहनम्, तस्य प्रतिव्यूहस्थापनम्—इति सांग्रामिकं दशममधिकरणम् । १२ ।

भेदोपादानानि, उपांशुदण्डाः—इति संघवृत्तमेकादशमधिकरणम् । १३ ।

दूतकर्म, मन्त्रयुद्धम्, सेनामुख्यवधः, मण्डलप्रोत्साहनम्, शस्त्राग्निरसप्रणिधयः, वीवधासारप्रसारवधः, योगातिसन्धानम्, दण्डातिसन्धानम्, एकविजयः—इत्याबलीयसं द्वादशमधिकरणम् । १४ ।

उपजापः, योगवामनम्, अपसर्पप्रणिधिः, पर्युपासनकर्म, अवमर्दः, लब्धप्रशमनम्—इति दुर्गलम्भोपायस्त्रयोदशमधिकरणम् ।१५ ।

Scanned with CamScanner

परवलघातप्रयोगः, प्रलम्भनम्, स्ववलोपघातप्रतीकारः–इत्यौपनिषदिकं चतुर्दशमधिकरणम् ।१६ ।

तन्त्रयुक्तयः–इति तन्त्रयुक्तिः पञ्चदशमधिकरणम् । १७ ।

शास्त्रसमुद्देशः पञ्चदशाधिकरणानि सार्शीति प्रकरणशतं सपञ्चाशदध्यायशतं षट् श्लोकसहस्राणीति । १८ ।

सुखग्रहणविज्ञेयं तत्त्वार्थपदनिश्चितम् ।
कौटिल्येन कृतं शास्त्रं विमुक्तग्रन्थविस्तरम् ।।१६ ।।

इति कौटिलीयेऽर्थशास्त्रे विनयाधिकारिके प्रथमेऽधिकरणे प्रकरणाधिकरणसमुद्देशः प्रथमोऽध्यायः ।।

२

[प्रथमं प्रकरणम्—विद्यासमुद्देशः, तत्र आन्वीक्षिकीस्थापना]

आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिश्चेति विद्याः । १ ।

त्रयी वार्त्ता दण्डनीतिश्चेति मानवाः । २ । त्रयीविशेषो ह्यान्वीक्षिकीति । ३ ।

वार्त्ता दण्डनीतिश्चेति वार्हस्पत्याः । ४ । संवरणमात्रं हि त्रयी लोकयात्राविद इति । ५ ।

दण्डनीतिरेका विद्येत्यौशनसाः ।६। तस्यां हि सर्वविद्यारम्भाः प्रतिवद्धा इति ।७।

चतस्र एव विद्या इति कौटिल्यः । ८ ।

ताभिर्धर्मार्थौ यद् विद्यात्तद् विद्यानां विद्यात्वम् । ६ ।

सांख्यं योगो लोकायतं चेत्यान्वीक्षिकी । १० । धर्माधर्मौ त्रय्यामर्थानर्थौ वार्त्तायां नयापनयौ दण्डनीत्यां वलावले चैतासां हेतुभिरन्वीक्षमाणा लोकस्योपकरोति व्यसनेऽभ्युदये च बुद्धिमवस्थापयति प्रज्ञावाक्यक्रियावैशारद्यं च करोति । ११ ।

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् ।
आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता ।। १२ ।।

इति विनयाधिकारिके प्रथमेऽधिकरणे विद्यासमुद्देशे आन्वीक्षिकीस्थापना द्वितीयोऽध्यायः ।।

३

[प्रथमं प्रकरणम्—विद्यासमुद्देशः, तत्र त्रयीस्थापना]

सामर्ग्यजुर्वेदास्त्रयस्त्रयी । १ । अथर्ववेदेतिहासवेदौ च वेदाः । २ ।

शिक्षा कल्पो व्याकरणं निरुक्तं छन्दोविचितिर्ज्योतिषमिति चाङ्गानि । ३ ।

एष त्रयीधर्मश्चतुर्णां वर्णानामाश्रमाणां च स्वधर्मस्थापनादौपकारिकः । ४ ।

स्वधर्मो ब्राह्मणस्याध्ययनमध्यापनं यजनं याजनं दानं प्रतिग्रहश्च । ५ ।

क्षत्रियस्याध्ययनं यजनं दानं शस्त्राजीवो भूतरक्षणं च ।६।

वैश्यस्याध्ययनं यजनं दानं कृषिपाशुपाल्ये वणिज्या च ।७।

शूद्रस्य द्विजातिशुश्रूषा वार्त्ता कारुकुशीलवकर्म च ।८।

गृहस्थस्य स्वधर्माजीवस्तुल्यैरसमानर्षिभिर्वैवाह्यमृतुगामित्वं देवपित्रतिथिपूजा भृत्येषु त्यागः शेषभोजनं च ।९।

ब्रह्मचारिणः स्वाध्यायोऽग्निकार्याभिषेकौ भैक्षव्रतित्वमाचार्ये प्राणान्तिकी वृत्तिस्तदभावे गुरुपुत्रे सब्रह्मचारिणि वा ।१०।

वानप्रस्थस्य ब्रह्मचर्यं भूमौ शय्या जटाजिनधारणमग्निहोत्राभिषेकौ देवतापित्रतिथिपूजा वन्यश्चाहारः ।११।

परिव्राजकस्य जितेन्द्रियत्वमनारम्भो निष्किंचनत्वं सङ्गत्यागो भैक्षव्रतमनेकत्रारण्ये च वासो बाह्याभ्यन्तरं च शौचम् ।१२।

सर्वेषामहिंसा सत्यं शौचमनसूयानृशंस्यं क्षमा च ।१३।

स्वधर्मः स्वर्गायानन्त्याय च ।१४। तस्यातिक्रमे लोकः संकरादुच्छिद्येत ।१५।

> तस्मात्स्वधर्मं भूतानां राजा न व्यभिचारयेत् ।
> स्वधर्मं संदधानो हि प्रेत्य चेह च नन्दति ।। १६ ।।
> व्यवस्थितार्यमर्यादः कृतवर्णाश्रमस्थितिः ।
> त्रय्याभिरक्षितो लोकः प्रसीदति न सीदति ।। १७ ।।

इति विनयाधिकारिके प्रथमेऽधिकरणे विद्यासमुद्देशे त्रयीस्थापना तृतीयोऽध्यायः ।।

४

[प्रथमं प्रकरणम्—विद्यासमुद्देशः, तत्र वार्त्तास्थापना दण्डनीतिस्थापना च]

कृषिपाशुपाल्ये वणिज्या च वार्त्ता, धान्यपशुहिरण्यकुप्यविष्टिप्रदानादौपकारिकी ।१। तया स्वपक्षं परपक्षं च वशीकरोति कोशदण्डाभ्याम् ।२।

आन्वीक्षिकीत्रयीवार्त्तानां योगक्षेमसाधनो दण्डः, तस्य नीतिर्दण्डनीतिः, अलब्धलाभार्था लब्धपरिरक्षणी रक्षितविवर्धनी वृद्धस्य तीर्थे प्रतिपादनी च ।३। तस्यामायत्ता लोकयात्रा ।४।

'तस्माल्लोकयात्रार्थी नित्यमुद्यतदण्डः स्यात् ।५। न ह्येवंविधं वशोपनयनमस्ति भूतानां यथा दण्डः ।' इत्याचार्याः ।६।

नेति कौटिल्यः ।७। तीक्ष्णदण्डो हि भूतानामुद्वेजनीयो भवति ।८। मृदुदण्डः परिभूयते ।९। यथार्हदण्डः पूज्यते ।१०।

सुविज्ञातप्रणीतो हि दण्डः प्रजा धर्मार्थकामैर्योजयति ।११। दुष्प्रणीतः काम-

Scanned with CamScanner

क्रोधाभ्यामवज्ञानाद्वा वानप्रस्थपरिव्राजकानपि कोपयति, किमङ्ग पुनर्गृहस्थान् ।१२। अप्रणीतस्तु मात्स्यन्यायमुद्भावयति ।१३। बलीयानबलं हि ग्रसते दण्डधराभावे ।१४। स तेन गुप्तः प्रभवतीति ।१५।

चतुर्वर्णाश्रमो लोको राज्ञा दण्डेन पालितः ।
स्वधर्मकर्माभिरतो वर्तते स्वेषु वर्त्मसु ॥१६॥

इति विनयाधिकारिके प्रथमेऽधिकरणे विद्यासमुद्देशे वार्त्तास्थापना दण्डनीतिस्थापना च चतुर्थोऽध्यायः ॥

विद्यासमुद्देशः समाप्तः ॥

५

[द्वितीयं प्रकरणम्—वृद्धसंयोगः]

तस्माद्दण्डमूलास्तिस्रो विद्याः ।१। विनयमूलो दण्डः प्राणभृतां योगक्षेमावहः ।२।

कृतकः स्वाभाविकश्च विनयः ।३। क्रिया हि द्रव्यं विनयति नाद्रव्यम् ।४। शुश्रूषाश्रवणग्रहणधारणविज्ञानोहापोहतत्त्वाभिनिविष्टबुद्धिं विद्या विनयति नेतरम् ।५।

विद्यानां तु यथास्वमाचार्यप्रामाण्याद्विनयो नियमश्च ।६।

वृत्तचौलकर्मा लिपिं संख्यानं चोपयुञ्जीत ।७। वृत्तोपनयनस्त्रयीमान्वीक्षिकीं च शिष्टेभ्यो वार्त्तामध्यक्षेभ्यो दण्डनीतिं वक्तृप्रयोक्तृभ्यः ।८।

ब्रह्मचर्यं चा षोडशाद्वर्षात् ।९। अतो गोदानं दारकर्म चास्य ।१०।

नित्यश्च विद्यावृद्धसंयोगो विनयवृद्ध्यर्थम्, तन्मूलत्वाद्विनयस्य ।११।

पूर्वमहर्भागं हस्त्यश्वरथप्रहरणविद्यासु विनयं गच्छेत् ।१२। पश्चिममितिहासश्रवणे ।१३। पुराणमितिवृत्तमाख्यायिकोदाहरणं धर्मशास्त्रमर्थशास्त्रं चेतीतिहासः ।१४। शेषमहोरात्रभागमपूर्वग्रहणं गृहीतपरिचयं च कुर्यात्, अगृहीतानामाभीक्ष्ण्यश्रवणं च ।१५। श्रुताद्धि प्रज्ञोपजायते प्रज्ञाया योगो योगादात्मवत्तेति विद्यानां सामर्थ्यम् ।१६।

विद्याविनीतो राजा हि प्रजानां विनये रतः ।
अनन्यां पृथिवीं भुङ्क्ते सर्वभूतहिते रतः ॥१७॥

इति विनयाधिकारिके प्रथमेऽधिकरणे वृद्धसंयोगः पञ्चमोऽध्यायः ॥

६

[तृतीयं प्रकरणम्—इन्द्रियजयः, तत्र अरिषड्वर्गत्यागः]

2006. विद्याविनयहेतुरिन्द्रियजयः कामक्रोधलोभमानमदहर्षत्यागात्कार्यः ।१। कर्णत्वगक्षिजिह्वाघ्राणेन्द्रियाणां शब्दस्पर्शरूपरसगन्धेष्वविप्रतिपत्तिरिन्द्रियजयः, शास्त्रानुष्ठानं वा ।२। कृत्स्नं हि शास्त्रमिदमिन्द्रियजयः ।३।

तद्विरुद्धवृत्तिरवश्येन्द्रियश्चातुरन्तोऽपि राजा सद्यो विनश्यति ।४। यथा दाण्डक्यो नाम भोजः कामाद्ब्राह्मणकन्यामभिमन्यमानः सबन्धुराष्ट्रो विननाश, करालश्च वैदेहः ।५। कोपाज्जनमेजयो ब्राह्मणेषु विक्रान्तः, तालजङ्घश्च भृगुषु ।६। लोभादैलश्चातुर्वर्ण्यमत्याहारयमाणः, सौवीरश्चाजविन्दुः ।७। मानाद्रावणः परदारानप्रयच्छन्, दुर्योधनो राज्यादंशं च ।८। मदाद्दम्भोद्भवो भूतावमानी, हैहयश्चार्जुनः ।९। हर्षाद्वातापिरगस्त्यमत्यासादयन्, वृष्णिसंघश्च द्वैपायनमिति ।१०।

एते चान्ये च बहवः शत्रुषड्वर्गमाश्रिताः ।
सबन्धुराष्ट्रा राजानो विनेशुरजितेन्द्रियाः ॥११॥
शत्रुषड्वर्गमुत्सृज्य जामदग्न्यो जितेन्द्रियः ।
अम्बरीषश्च नाभागो बुभुजाते चिरं महीम् ॥१२॥

इति विनयाधिकारिके प्रथमेऽधिकरणे इन्द्रियजये अरिषड्वर्गत्यागः षष्ठोऽध्यायः ॥

७

[तृतीयं प्रकरणम्—इन्द्रियजयः, तत्र राजर्षिवृत्तम्]

तस्मादरिषड्वर्गत्यागेनेन्द्रियजयं कुर्वीत, वृद्धसंयोगेन प्रज्ञाम्, चारेण चक्षुः, उत्थानेन योगक्षेमसाधनम्, कार्यानुशासनेन स्वधर्मस्थापनम्, विनयं विद्योपदेशेन, लोकप्रियत्वमर्थसंयोगेन, हितेन वृत्तिम् ।१।

एवं वश्येन्द्रियः परस्त्रीद्रव्यहिंसाश्च वर्जयेत्, स्वप्नं लौल्यमनृतमुद्धतवेषत्वमनर्थ्यसंयोगमधर्मसंयुक्तमनर्थसंयुक्तं च व्यवहारम् ।२।

धर्मार्थाविरोधेन कामं सेवेत, न निःसुखः स्यात् ।३। समं वा त्रिवर्गमन्योन्यानुबद्धम् ।४। एको ह्यत्यासेवितो धर्मार्थकामानामात्मानमितरौ च पीडयति ।५।

अर्थ एव प्रधान इति कौटिल्यः ।६। अर्थमूलौ हि धर्मकामाविति ।७।

मर्यादां स्थापयेदाचार्यानमात्यान्वा, य एनमपायस्थानेभ्यो वारयेयुः, छायानालिकाप्रतोदेन वा रहसि प्रमाद्यन्तमभितुदेयुः ।८।

सहायसाध्यं राजत्वं चक्रमेकं न वर्तते ।
कुर्वीत सचिवांस्तस्मात्तेषां च शृणुयान्मतम् ॥९॥

इति विनयाधिकारिके प्रथमेऽधिकरणे इन्द्रियजये राजर्षिवृत्तं सप्तमोऽध्यायः ॥ इन्द्रियजयः समाप्तः ॥

८

[चतुर्थं प्रकरणम्—अमात्योत्पत्तिः]

'सहाध्यायिनोऽमात्यान्कुर्वीत' दृष्टशौचसामर्थ्यत्वात्, इति भारद्वाजः ।१। 'ते ह्यस्य विश्वास्या भवन्ति' इति ।२।

Scanned with CamScanner

नेति विशालाक्षः ।३। 'सहक्रीडितत्वात् परिभवन्त्येनम् ।४। ये ह्यस्य गुह्य-सधर्माणस्तानमात्यान्कुर्वीत, समानशीलव्यसनत्वात् ।५। ते ह्यस्य मर्मज्ञभयान्नापराध्यन्ति' इति ।६।

'साधारण एष दोषः' इति पाराशराः ।७। 'तेषामपि मर्मज्ञभयात्कृताकृतान्यनुवर्तेत ।८।

यावद्भ्यो गुह्यमाचष्टे जनेभ्यः पुरुषाधिपः ।
अवशः कर्मणा तेन वश्यो भवति तावताम् ॥९॥

'य एनमापत्सु प्राणावाधयुक्तास्त्वनुगृह्णीयुस्तानमात्यान्कुर्वीत, दृष्टानुरागत्वात्' इति ।१०।

नेति पिशुनः ।११। 'भक्तिरेषा न बुद्धिगुणः ।१२। संख्यातार्थेषु कर्मसु नियुक्ता ये यथादिष्टमर्थं सविशेषं वा कुर्युस्तानमात्यान्कुर्वीत, दृष्टगुणत्वात्' इति ।१३।

नेति कौणपदन्तः ।१४। 'अन्यैरमात्यगुणैरयुक्ता ह्येते ।१५। पितृपैतामहानमात्यान्कुर्वीत, दृष्टावदानत्वात् ।१६। ते ह्येनमपचरन्तमपि न त्यजन्ति, सगन्धत्वात् ।१७। अमानुषेष्वपि चैतद् दृश्यते ।१८। गावो ह्यसगन्धं गोगणमतिक्रम्य सगन्धेष्वेवावतिष्ठन्ते' इति ।१९।

नेति वातव्याधिः ।२०। 'ते ह्यस्य सर्वमवगृह्य स्वामिवत्प्रचरन्ति ।२१। तस्मान्नीतिविदो नवानमात्यान्कुर्वीत ।२२। नवास्तु यमस्थानं दण्डधरं मन्यमाना नापराध्यन्ति' इति ।२३।

नेति बाहुदन्तीपुत्रः ।२४। 'शास्त्रविददृष्टकर्मा कर्मसु विषादं गच्छेत् ।२५। तस्मादभिजनप्रज्ञाशौचशौर्यानुरागयुक्तानमात्यान्कुर्वीत, गुणप्राधान्यात्' इति ।२६।

सर्वमुपपन्नमिति कौटिल्यः ।२७। कार्यसामर्थ्याद्धि पुरुषसामर्थ्यं कल्प्यते ।२८। सामर्थ्यतश्च—

विभज्यामात्यविभवं देशकालौ च कर्म च ।
अमात्याः सर्व एवैते कार्याः स्युर्न तु मन्त्रिणः ॥२९॥

इति विनयाधिकारिके प्रथमेऽधिकरणे अमात्योत्पत्तिः अष्टमोऽध्यायः ॥

९

[पञ्चमं प्रकरणम्—मन्त्रिपुरोहितोत्पत्तिः]

जानपदोऽभिजातः स्ववग्रहः कृतशिल्पश्चक्षुष्मान्प्राज्ञो धारयिष्णुर्दक्षो वाग्मी प्रगल्भः प्रतिपत्तिमानुत्साहप्रभावयुक्तः क्लेशसहः शुचिर्मैत्रो दृढभक्तिः शीलबलारोग्य-

Scanned with CamScanner

सत्त्वयुक्तः स्तम्भचापलहीनः संप्रियो वैराणामकर्तेत्यमात्यसंपत् ।१। अतः पादार्धगुणहीनौ मध्यमावरौ ।२।

तेषां जनपदमभिजनमवग्रहं चाप्ततः परीक्षेत, समानविद्येभ्यः शिल्पं शास्त्रचक्षुष्मत्तां च, कर्मारम्भेषु प्रज्ञां धारयिष्णुतां दाक्ष्यं च, कथायोगेषु वाग्मित्वं प्रागल्भ्यं प्रतिभानवत्त्वं च, आपद्युत्साहप्रभावौ क्लेशसहत्वं च, संव्यवहाराच्छौचं मैत्रतां दृढभक्तित्वं च, संवासिभ्यः शीलबलारोग्यसत्त्वयोगमस्तम्भमचापलं च, प्रत्यक्षतः संप्रियत्वमवैरत्वं च ।३।

प्रत्यक्षपरोक्षानुमेया हि राजवृत्तिः ।४। स्वयंदृष्टं प्रत्यक्षम् ।५। परोपदिष्टं परोक्षम् ।६। कर्मसु कृतेनाकृतावेक्षणमनुमेयम् ।७। यौगपद्यात्तु कर्मणामनेकत्वादनेकस्थत्वाच्च देशकालात्ययो मा भूदिति परोक्षममात्यैः कारयेत् ।८। इत्यमात्यकर्म।

पुरोहितमुदितोदितकुलशीलं साङ्गे वेदे दैवे निमित्ते दण्डनीत्यां चाभिविनीतमापदां दैवमानुषीणामथर्वभिरुपायैश्च प्रतिकर्तारं कुर्वीत ।९। तमाचार्यं शिष्यः पितरं पुत्रो भृत्यः स्वामिनमिव चानुवर्तेत ।१०।

ब्राह्मणेनैधितं क्षत्रं मन्त्रिमन्त्राभिमन्त्रितम् ।
जयत्यजितमत्यन्तं शास्त्रानुगमशस्त्रितम् ।।११।।

इति विनयाधिकारिके प्रथमेऽधिकरणे मन्त्रिपुरोहितोत्पत्तिः नवमोऽध्यायः ।।

१०

[षष्ठं प्रकरणम्——उपधाभिः शौचाशौचज्ञानममात्यानाम्]

मन्त्रिपुरोहितसखः सामान्येष्वधिकरणेषु स्थापयित्वामात्यानुपधाभिः शोधयेत् ।१।

पुरोहितमयाज्ययाजनाध्यापने नियुक्तममृष्यमाणं राजावक्षिपेत् ।२। स सत्त्रिभिः शपथपूर्वमेकैकममात्यमुपजापयेत्——'अधार्मिकोऽयं राजा, साधु धार्मिकमन्यमस्य तत्कुलीनमपरुद्धं कुल्यमेकप्रग्रहं सामन्तमाटविकमौपपादिकं वा प्रतिपादयामः, सर्वेषामेतद्रोचते, कथं वा तव' इति ।३। प्रत्याख्याने शुचिः । इति धर्मोपधा ।४।

सेनापतिरसत्प्रग्रहेणावक्षिप्तः सत्त्रिभिरेकैकममात्यमुपजापयेत् लोभनीयेनार्थेन राजविनाशाय, 'सर्वेषामेतद्रोचते, कथं वा तव' इति ।५। प्रत्याख्याने शुचिः । इत्यर्थोपधा ।६।

परिव्राजिका लब्धविश्वासान्तःपुरे कृतसत्कारा महामात्रमेकैकमुपजपेत्——'राजमहिषी त्वां कामयते कृतसमागमोपाया, महानर्थश्च ते भविष्यति' इति ।७। प्रत्याख्याने शुचिः । इति कामोपधा ।८।

प्रहवणनिमित्तमेकोऽमात्यः सर्वानमात्यानावाहयेत् ।९। तेनोद्वेगेन राजा तानव-

रुन्ध्यात् ।१०। कापटिकश्चात्र पूर्वविरुद्धस्तेषामर्थमानावक्षिप्तमेकैकममात्यमुपजपेत्—'असत्प्रवृत्तोऽयं राजा, साधु एनं हत्वान्यं प्रतिपादयामः, सर्वेषामेतद्रोचते, कथं वा तव' इति ।११। प्रत्याख्याने शुचिः । इति भयोपधा ।१२।

तत्र धर्मोपधाशुद्धान् धर्मस्थीयकण्टकशोधनेषु कर्मसु स्थापयेत्, अर्थोपधाशुद्धान् समाहर्तृसंनिधातृनिचयकर्मसु, कामोपधाशुद्धान् बाह्याभ्यन्तरविहाररक्षासु, भयोपधाशुद्धान् आसन्नकार्येषु राज्ञः ।१३। सर्वोपधाशुद्धान् मन्त्रिणः कुर्यात् ।१४। सर्वत्राशुचीन् खनिद्रव्यहस्तिवनकर्मान्तेषूपयोजयेत् ।१५।

त्रिवर्गभयसंशुद्धानमात्यान्स्वेषु कर्मसु ।
अधिकुर्याद्यथाशौचमित्याचार्या व्यवस्थिताः ॥१६॥
न त्वेव कुर्यादात्मानं देवीं वा लक्ष्मीश्वरः ।
शौचहेतोरमात्यानामेतत्कौटिल्यदर्शनम् ॥१७॥
न दूषणमदुष्टस्य विषेणेवाम्भसश्चरेत् ।
कदाचिद्धि प्रदुष्टस्य नाधिगम्येत भेषजम् ॥१८॥
कृता च कलुषा बुद्धिरुपधाभिश्चतुर्विधा ।
नागत्वान्तं निवर्तेत स्थिता सत्त्ववतां धृतौ ॥१९॥
तस्माद्बाह्यमधिष्ठानं कृत्वा कार्ये चतुर्विधे ।
शौचाशौचममात्यानां राजा मार्गेत सत्त्रिभिः ॥२०॥

इति विनयाधिकारिके प्रथमेऽधिकरणे उपधाभिः शौचाशौचज्ञानममात्यानाम् दशमोऽध्यायः ॥

११

[सप्तमं प्रकरणम्—गूढपुरुषोत्पत्तिः, तत्र संस्थोत्पत्तिः]

उपधाभिः शुद्धामात्यवर्गो गूढपुरुषानुत्पादयेत् कापटिकोदास्थितगृहपतिकवैदेहकतापसव्यञ्जनान् सत्त्रितीक्ष्णरसदभिक्षुकीश्च ।१।

परमर्मज्ञः प्रगल्भश्छात्रः कापटिकः ।२। तमर्थमानाभ्यां प्रोत्साह्य मन्त्री ब्रूयात्—'राजानं मां च प्रमाणं कृत्वा यस्य यदकुशलं पश्यसि तत्तदानीमेव प्रत्यादिश' इति ।३।

प्रव्रज्याप्रत्यवसितः प्रज्ञाशौचयुक्त उदास्थितः ।४। स वार्त्ताकर्मप्रदिष्टायां भूमौ प्रभूतहिरण्यान्तेवासी कर्म कारयेत् ।५। कर्मफलाच्च सर्वप्रव्रजितानां ग्रासाच्छादनावसथान् प्रतिविदध्यात् ।६। वृत्तिकामांश्चोपजपेत्—'एतेनैव वेषेण राजार्थश्चरितव्यो भक्तवेतनकाले चोपस्थातव्यम्' इति ।७। सर्वप्रव्रजिताश्च स्वं स्वं वर्गमेवमुपजपेयुः ।८।

कर्षको वृत्तिक्षीणः प्रज्ञाशौचयुक्तो गृहपतिकव्यञ्जनः ।९। स कृषिकर्मप्रदिष्टायां भूमौ––इति समानं पूर्वेण ।१०।

वाणिजको वृत्तिक्षीणः प्रज्ञाशौचयुक्तो वैदेहकव्यञ्जनः ।११। स वणिक्कर्मप्रदिष्टायां भूमौ––इति समानं पूर्वेण ।१२।

मुण्डो जटिलो वा वृत्तिकामस्तापसव्यञ्जनः ।१३। स नगराभ्याशे प्रभूतमुण्डजटिलान्तेवासी शाकं यवमुष्टिं वा मासद्विमासान्तरं प्रकाशमश्नीयात्, गूढमिष्टमाहारम् ।१४। वैदेहकान्तेवासिनश्चैनं समिद्धयोगैरर्चयेयुः ।१५। शिष्याश्चास्यावेदयेयुः––'असौ सिद्धः सामेधिकः' इति ।१६। समेधाशास्तिभिश्चाभिगतानामङ्गविद्यया शिष्यसंज्ञाभिश्च कर्माण्यभिजनेऽवसितान्यादिशेत्––अल्पलाभम् अग्निदाहं चोरभयं दूष्यवधं तुष्टिदानं विदेशप्रवृत्तिज्ञानम्, 'इदमद्य श्वो वा भविष्यति, इदं वा राजा करिष्यति' इति ।१७। तदस्य गूढाः सत्त्रिणश्च संपादयेयुः ।१८। सत्त्वप्रज्ञावाक्यशक्तिसंपन्नानां राजभाग्यमनुव्याहरेत्, मन्त्रिसंयोगं च ब्रूयात् ।१९। मन्त्री चैषां वृत्तिकर्मभ्यां वियतेत ।२०।

ये च कारणादभिक्रुद्धास्तानर्थमानाभ्यां शमयेत्, अकारणक्रुद्धांस्तूष्णींदण्डेन, राजद्विष्टकारिणश्च ।२१।

पूजिताश्चार्थमानाभ्यां राज्ञा राजोपजीविनाम् ।
जानीयुः शौचमित्येताः पञ्च संस्थाः प्रकीर्तिताः ॥२२॥

इति विनयाधिकारिके प्रथमेऽधिकरणे गूढपुरुषोत्पत्तौ संस्थोत्पत्तिः एकादशोऽध्यायः ॥

१२

[सप्तमं प्रकरणम्––गूढपुरुषोत्पत्तिः, तत्र संचारोत्पत्तिः]

[अष्टमं प्रकरणम्––गूढपुरुषप्रणिधिः]

ये चाप्यसंबन्धिनोऽवश्यभर्तव्यास्ते लक्षणमङ्गविद्यां जम्भकविद्यां मायागतमाश्रमधर्मं निमित्तमन्तरचक्रमित्यधीयानाः सत्त्रिणः, संसर्गविद्यां वा ।१।

ये जनपदे शूरास्त्यक्तात्मानो हस्तिनं व्यालं वा द्रव्यहेतोः प्रतियोधयेयुस्ते तीक्ष्णाः ।२।

ये बन्धुषु निःस्नेहाः क्रूरा अलसाश्च ते रसदाः ।३।

परिव्राजिका वृत्तिकामा दरिद्रा विधवा प्रगल्भा ब्राह्मण्यन्तःपुरे कृतसत्कारा महामात्रकुलान्यभिगच्छेत् ।४। एतया मुण्डा वृषल्यो व्याख्याताः ।५। इति संचाराः ।

[इति सप्तमं प्रकरणं समाप्तम्]

तान् राजा स्वविषये मन्त्रिपुरोहितसेनापतियुवराजदौवारिकान्तर्वंशिकप्रशास्तृसमाहर्तृसंनिधातृप्रदेष्टृनायकपौरव्यावहारिककार्मान्तिकमन्त्रिपरिषदध्यक्षदण्डदुर्गान्तिपालाटविकेषु श्रद्धेयदेशवेषशिल्पभाषाभिजनापदेशान् भक्तितः सामर्थ्ययोगाच्चापसर्पयेत् ।६।

तेषां बाह्यं चारं छत्रभृङ्गारव्यजनपादुकासनयानवाहनोपग्राहिणस्तीक्ष्णा विद्युः ।७। तं सत्त्रिणः संस्थास्वर्पयेयुः ।८।

सूदारालिकस्नापकसंवाहकास्तरककल्पकप्रसाधकोदकपरिचारका रसदाः कुब्जवामनकिरातमूकबधिरजडान्धच्छद्मानो नटनर्तकगायनवादकवाग्जीवनकुशीलवाः स्त्रियश्चाभ्यन्तरं चारं विद्युः ।९। तं भिक्षुक्यः संस्थास्वर्पयेयुः ।१०।

संस्थानामन्तेवासिनः संज्ञालिपिभिश्चारसंचारं कुर्युः ।११। न चान्योन्यं संस्थास्ते वा विद्युः ।१२।

भिक्षुकीप्रतिषेधे द्वाःस्थपरंपरा मातापितृव्यञ्जनाः शिल्पकारिकाः कुशीलवा दास्यो वा गीतपाठ्यवाद्यभाण्डगूढलेख्यसंज्ञाभिर्वा चारं निर्हरेयुः ।१३। दीर्घरोगोन्मादाग्निरसविसर्गेण वा गूढनिर्गमनम् ।१४।

त्रयाणामेकवाक्ये संप्रत्ययः ।१५। तेषामभीक्ष्णविनिपाते तूष्णींदण्डः प्रतिषेधः ।१६।

कण्टकशोधनोक्ताश्चापसर्पाः परेषु कृतवेतना वसेयुरसंपातिनश्चारार्थम् ।१७। त उभयवेतनाः ।१८।

गृहीतपुत्रदारांश्च कुर्यादुभयवेतनान् ।
तांश्चारिप्रहितान्विद्यात्तेषां शौचं च तद्विधैः ॥१९॥
एवं शत्रौ च मित्रे च मध्यमे चावपेच्चरान् ।
उदासीने च तेषां च तीर्थेष्वष्टादशस्वपि ॥२०॥
अन्तर्गृहचरास्तेषां कुब्जवामनपण्डकाः ।
शिल्पवत्यः स्त्रियो मूकाश्चित्राश्च म्लेच्छजातयः ॥२१॥
दुर्गेषु वणिजः संस्था दुर्गान्ते सिद्धतापसाः ।
कर्षकोदास्थिता राष्ट्रे राष्ट्रान्ते व्रजवासिनः ॥२२॥
वने वनचराः कार्याः श्रमणाटविकादयः ।
परप्रवृत्तिज्ञानार्थाः शीघ्राश्चारपरंपराः ॥२३॥
परस्य चैते बोद्धव्यास्तादृशैरेव तादृशाः ।
चारसंचारिणः संस्था गूढाश्चागूढसंज्ञिताः ॥२४॥
अकृत्यान्कृत्यपक्षीयैर्दर्शितान्कार्यहेतुभिः ।
परापसर्पज्ञानार्थं मुख्यानन्तेषु वासयेत् ॥२५॥

इति विनयाधिकारिके प्रथमेऽधिकरणे गूढपुरुषोत्पत्तौ संचारोत्पत्तिः, गूढपुरुषप्रणिधिः द्वादशोऽध्यायः ॥

Scanned with CamScanner

१३

[नवमं प्रकरणम्—स्वविषये कृत्याकृत्यपक्षरक्षणम्]

कृतमहामात्रापसर्पः पौरजानपदानपसर्पयेत् ।१। सत्रिणो द्वन्द्विनस्तीर्थसभापूगजनसमवायेषु विवादं कुर्युः ।२। 'सर्वगुणसंपन्नश्चायं राजा श्रूयते, न चास्य कश्चिद्गुणो दृश्यते यः पौरजानपदान् दण्डकराभ्यां पीडयति' इति ।३। तत्र येऽनुप्रशंसेयुस्तानितरस्तं च प्रतिषेधयेत् ।४। 'मात्स्यन्यायाभिभूताः प्रजा मनुं वैवस्वतं राजानं चक्रिरे ।५। धान्यषड्भागं पण्यदशभागं हिरण्यं चास्य भागधेयं प्रकल्पयामासुः ।६। तेन भृता राजानः प्रजानां योगक्षेमावहाः ।७। तेषां किल्बिषमदण्डकरा हरन्त्ययोगक्षेमावहाश्च प्रजानाम् ।८। तस्मादुञ्छषड्भागमारण्यका अपि निर्वपन्ति—"तस्यैतद्भागधेयं योऽस्मान्गोपयति" इति ।९। इन्द्रयमस्थानमेतद्राजानः प्रत्यक्षहेडप्रसादाः ।१०। तानवमन्यमानान् दैवोऽपि दण्डः स्पृशति ।११। तस्माद्राजानो नावमन्तव्याः ।१२।' इत्येवं क्षुद्रकान् प्रतिषेधयेत् ।१३। किंवदन्तीं च विद्युः ।१४।

ये चास्य धान्यपशुहिरण्यान्याजीवन्ति, तैरुपकुर्वन्ति व्यसनेऽभ्युदये वा, कुपितं वन्धुं राष्ट्रं वा व्यावर्तयन्ति, अमित्रमाटविकं वा प्रतिषेधयन्ति, तेषां मुण्डजटिलव्यञ्जनास्तुष्टातुष्टत्वं विद्युः ।१५। तुष्टान् भूयोऽर्थमानाभ्यां पूजयेत् ।१६।

अतुष्टांस्तुष्टिहेतोस्त्यागेन साम्ना च प्रसादयेत् ।१७। परस्पराद्वा भेदयेदेनान्, सामन्ताटविकतत्कुलीनापरुद्धेभ्यश्च ।१८। तथाप्यतुष्यतो दण्डकरसाधनाधिकारेण जनपदविद्वेषं ग्राहयेत् ।१९। विद्विष्टानुपांशुदण्डेन जनपदकोपेन वा साधयेत् ।२०। गुप्तपुत्रदारानाकरकर्मान्तेषु वा वासयेत् परेषामास्पदभयात् ।२१।

क्रुद्धलुब्धभीतमानिनस्तु परेषां कृत्याः ।२२। तेषां कार्तान्तिकनैमित्तिकमौहूर्तिकव्यञ्जनाः परस्पराभिसंवन्धममित्राटविकसंवन्धं वा विद्युः ।२३। तुष्टानर्थमानाभ्यां पूजयेत् ।२४। अतुष्टान् सामदानभेददण्डैः साधयेत् ।२५।

एवं स्वविषये कृत्यानकृत्यांश्च विचक्षणः ।
परोपजापात्संरक्षेत्प्रधानान् क्षुद्रकानपि ।।२६।।

इति विनयाधिकारिके प्रथमेऽधिकरणे स्वविषये कृत्याकृत्यपक्षरक्षणं त्रयोदशोऽध्यायः ।।

१४

[दशमं प्रकरणम्—परविषये कृत्याकृत्यपक्षोपग्रहः]

कृत्याकृत्यपक्षोपग्रहः स्वविषये व्याख्यातः, परविषये वाच्यः ।१।

संश्रुत्यार्थान् विप्रलब्धः, तुल्यकारिणोः शिल्पे वोपकारे विमानितः, वल्लभा-

वरुद्धः, समाहूय पराजितः, प्रवासोपतप्तः, कृत्वा व्ययमलब्धकार्यः, स्वधर्माद्दायाद्याद्वोपरुद्धः, मानाधिकाराभ्यां भ्रष्टः, कुल्यैरन्तर्हितः, प्रसभाभिमृष्टस्त्रीकः, काराभिन्यस्तः, परोक्तदण्डितः, मिथ्याचारवारितः, सर्वस्वमाहारितः, बन्धनपरिक्लिष्टः, प्रवासितबन्धुः—इति क्रुद्धवर्गः ।२।

स्वयमुपहतः, विप्रकृतः, पापकर्माभिख्यातः, तुल्यदोषदण्डेनोद्विग्नः, पर्यात्तभूमिः, दण्डेनोपनतः, सर्वाधिकरणस्थः सहसोपचितार्थः, तत्कुलीनोपाशंसुः, प्रद्विष्टो राज्ञा, राजद्वेषी च—इति भीतवर्गः ।३।

परिक्षीणः, अन्यात्तस्वः, कदर्यः, व्यसनी, अत्याहितव्यवहारश्च—इति लुब्धवर्गः ।४।

आत्मसंभावितः, मानकामः, शत्रुपूजामर्षितः, नीचैरुपहितः, तीक्ष्णः, साहसिकः, भोगेनासंतुष्टः—इति मानिवर्गः ।५।

तेषां मुण्डजटिलव्यञ्जनैर्यो यद्भक्तिः कृत्यपक्षीयस्तं तेनोपजापयेत् ।६।

'यथा मदान्धो हस्ती मत्तेनाधिष्ठितो यद्यदासादयति तत्सर्वं प्रमृद्नाति, एवमयमशास्त्रचक्षुरन्धो राजा पौरजानपदवधायाभ्युत्थितः, शक्यमस्य प्रतिहस्तिप्रोत्साहनेनापकर्तुम्, अमर्षः क्रियताम्' इति क्रुद्धवर्गमुपजापयेत् ।७।

'यथा लीनः सर्पो यस्माद्भयं पश्यति तत्र विषमुत्सृजति, एवमयं राजा जातदोषाशङ्कस्त्वयि पुरा क्रोधविषमुत्सृजति, अन्यत्र गम्यताम्' इति भीतवर्गमुपजापयेत् ।८।

'यथा श्वगणिनां धेनुः श्वभ्यो दुह्यते न ब्राह्मणेभ्यः, एवमयं राजा सत्त्वप्रज्ञावाक्यशक्तिहीनेभ्यो दुह्यते नात्मगुणसंपन्नेभ्यः, असौ राजा पुरुषविशेषज्ञः, तत्र गम्यताम्' इति लुब्धवर्गमुपजापयेत् ।९।

'यथा चण्डालोदपानश्चण्डालानामेवोपभोग्यो नान्येषाम्, एवमयं राजा नीचो नीचानामेवोपभोग्यो न त्वद्विधानामार्याणाम्, असौ राजा पुरुषविशेषज्ञः, तत्र गम्यताम्' इति मानिवर्गमुपजापयेत् ।१०।

तथेति प्रतिपन्नांस्तान् संहितान्पणकर्मणा ।
योजयेत यथाशक्ति सापसर्पान्स्वकर्मसु ।।११।।
लभेत सामदानाभ्यां कृत्यांश्च परभूमिषु ।
अकृत्यान्भेददण्डाभ्यां परदोषांश्च दर्शयन् ।।१२।।

इति विनयाधिकारिके प्रथमेऽधिकरणे परविषये कृत्याकृत्यपक्षोपग्रहः चतुर्दशोऽध्यायः ।।

T. D. C. Part II (Major) Coldcourse

१५

[एकादशं प्रकरणम्—मन्त्राधिकारः]

कृतस्वपक्षपरपक्षोपग्रहः कार्यारम्भांश्चिन्तयेत् ।१। मन्त्रपूर्वाः सर्वारम्भाः ।२। तदुद्देशः संवृतः कथानामनिःश्रावी पक्षिभिरप्यना-

How many types of राजवृत्तिः? (प्रत्यक्ष, परोक्ष, अनुमेय) १९.

लोक्यः स्यात् ।३। श्रूयते हि शुकसारिकाभिर्मन्त्रो भिन्नः, श्वभिरप्यन्यैश्च तिर्यग्योनिभिरिति ।४। तस्मान्मन्त्रोद्देशमनायुक्तो नोपगच्छेत् ।५। उच्छिद्येत मन्त्रभेदी ।६।

मन्त्रभेदो हि दूतामात्यस्वामिनामिङ्गिताकाराभ्याम् ।७। इङ्गितमन्यथावृत्तिः ।८। आकृतिग्रहणमाकारः ।९। तस्य संवरणमायुक्तपुरुषरक्षणमा कार्यकालादिति ।१०। तेषां हि प्रमादमदसुप्तप्रलापाः, कामादिरुत्सेकः, प्रच्छन्नोऽवमतो वा मन्त्रं भिनत्ति ।११। तस्माद्रक्षेन्मन्त्रम् ।१२।

'मन्त्रभेदो ह्ययोगक्षेमकारो राज्ञस्तदायुक्तपुरुषाणां च ।१३। तस्माद् गुह्यमेको मन्त्रयेत' इति भारद्वाजः ।१४। 'मन्त्रिणामपि हि मन्त्रिणो भवन्ति' तेषामप्यन्ये ।१५। सैषा मन्त्रिपरंपरा मन्त्रं भिनत्ति ।१६।

'तस्मान्नास्य परे विद्युः कर्म किंचिच्चिकीर्षितम् ।
आरब्धारस्तु जानीयुरारब्धं कृतमेव वा ॥१७॥'

'नैकस्य मन्त्रसिद्धिरस्ति' इति विशालाक्षः ।१८। 'प्रत्यक्षपरोक्षानुमेया हि राजवृत्तिः ।१९। अनुपलब्धस्य ज्ञानमुपलब्धस्य निश्चितबलाधानमर्थद्वैधस्य संशयच्छेदनमेकदेशदृष्टस्य शेषोपलब्धिरिति' मन्त्रिसाध्यमेतत् ।२०। तस्माद् बुद्धिवृद्धैः सार्धमध्यासीत मन्त्रम् ।२१।

'न कंचिदवमन्येत सर्वस्य शृणुयान्मतम् ।
बालस्याप्यर्थवद्वाक्यमुपयुञ्जीत पण्डितः ॥२२॥'

'एतन्मन्त्रज्ञानम्, नैतन्मन्त्ररक्षणम्' इति पाराशराः ।२३। 'यदस्य कार्यमभिप्रेतं तत्प्रतिरूपकं मन्त्रिणः पृच्छेत्—"कार्यमिदमेवमासीत्, एवं वा यदि भवेत्, तत्कथं कर्तव्यम्" इति ।२४। ते यथा ब्रूयुस्तत्कुर्यात् ।२५। एवं मन्त्रोपलब्धिः संवृतिश्च भवति' इति ।२६। 2004

नेति पिशुनः ।२७। 'मन्त्रिणो हि व्यवहितमर्थं वृत्तमवृत्तं वा पृष्टा अनादरेण ब्रुवन्ति प्रकाशयन्ति वा ।२८। स दोषः ।२९। तस्मात्कर्मसु ये येष्वभिप्रेतास्तैः सह मन्त्रयेत ।३०। तैर्मन्त्रयमाणो हि मन्त्रसिद्धिं गुप्तिं च लभते' इति ।३१।

नेति कौटिल्यः ।३२। अनवस्था ह्येषा ।३३। मन्त्रिभिस्त्रिभिश्चतुर्भिर्वा सह मन्त्रयेत ।३४। मन्त्रयमाणो ह्येकेनार्थकृच्छ्रेषु निश्चयं नाधिगच्छेत् ।३५। एकश्च मन्त्री यथेष्टमनवग्रहश्चरति ।३६। द्वाभ्यां मन्त्रयमाणो द्वाभ्यां संहताभ्यामवगृह्यते, विगृहीताभ्यां विनाश्यते ।३७। तत्त्रिषु चतुर्षु वा कृच्छ्रेणोपपद्यते ।३८। महादोषमुपपन्नं तु भवति ।३९। ततः परेषु कृच्छ्रेणार्थनिश्चयो गम्यते, मन्त्रो वा रक्ष्यते ।४०। देशकालकार्यवशेन त्वेकेन सह द्वाभ्यामेको वा यथासामर्थ्यं मन्त्रयेत ।४१।

* कर्मणामारम्भोपायः पुरुषद्रव्यसंपद् देशकालविभागो विनिपातप्रतीकारः कार्यसिद्धिरिति पञ्चाङ्गो मन्त्रः ।४२।

Name the five अङ्ग's of मन्त्र. 1.15.42

तानेकैकशः पृच्छेत् समस्तांश्च ।४३। हेतुभिश्चैषां मतिप्रविवेकान् विद्यात् ।४४। अवाप्तार्थः कालं नातिक्रामयेत् ।४५। न दीर्घकालं मन्त्रयेत, न तेषां पक्षीयैर्येषामप-कुर्यात् ।४६।

'मन्त्रिपरिषदं द्वादशामात्यान्कुर्वीत' इति मानवाः ।४७। 'षोडश' इति बार्हस्पत्याः ।४८। 'विंशतिम्' इत्यौशनसाः ।४९। यथासामर्थ्यमिति कौटिल्यः ।५०।

ते ह्यस्य स्वपक्षं परपक्षं च चिन्तयेयुः ।५१। अकृतारम्भमारब्धानुष्ठानमनुष्ठित-विशेषं नियोगसंपदं च कर्मणां कुर्युः ।५२।

आसन्नैः सह कार्याणि पश्येत् ।५३। अनासन्नैः सह पत्रसंप्रेषणेन मन्त्रयेत ।५४।

इन्द्रस्य हि मन्त्रिपरिषदृषीणां सहस्रम् ।५५। स तच्चक्षुः ।५६। तस्मादिमं द्व्यक्षं सहस्राक्षमाहुः ।५७।

आत्ययिके कार्ये मन्त्रिणो मन्त्रिपरिषदं चाहूय ब्रूयात् ।५८। तत्र यद्भूयिष्ठा ब्रूयुः कार्यसिद्धिकरं वा तत्कुर्यात् ।५९।

कुर्वतश्च—

नास्य गुह्यं परे विद्युश्छिद्रं विद्यात्परस्य च ।
गूहेत्कूर्म इवाङ्गानि यत्स्याद्विवृतमात्मनः ॥६०॥
यथा ह्यश्रोत्रियः श्राद्धं न सतां भोक्तुमर्हति ।
एवमश्रुतशास्त्रार्थो न मन्त्रं श्रोतुमर्हति ॥६१॥

इति विनयाधिकारिके प्रथमेऽधिकरणे मन्त्राधिकारः पञ्चदशोऽध्यायः ॥

१६

[द्वादशं प्रकरणम्—दूतप्रणिधिः]

उद्वृतमन्त्रो दूतप्रणिधिः ।१।

अमात्यसंपदोपेतो निसृष्टार्थः ।२। पादगुणहीनः परिमितार्थः ।३। अर्धगुणहीनः शासनहरः ।४।

सुप्रतिविहितयानवाहनपुरुषपरिवापः प्रतिष्ठेत ।५। शासनमेवं वाच्यः परः, स वक्ष्यत्येवम्, तस्येदं प्रतिवाक्यम्, एवमतिसंधातव्यम्, इत्यधीयानो गच्छेत् ।६। अटव्य-न्तपालपुरराष्ट्रमुख्यैश्च प्रतिसंसर्गं गच्छेत् ।७। अनीकस्थानयुद्धप्रतिग्रहापसारभूमी-रात्मनः परस्य चावेक्षेत ।८। दुर्गराष्ट्रप्रमाणं सारवृत्तिगुप्तिच्छिद्राणि चोपलभेत ।९।

पराधिष्ठानमनुज्ञातः प्रविशेत् ।१०। शासनं च यथोक्तं ब्रूयात्, प्राणाबाधेऽपि दृष्टे ।११।

परस्य वाचि वक्त्रे दृष्ट्यां च प्रसादं वाक्यपूजनमिष्टपरिप्रश्नं गुणकथासङ्गमासन्नमासनं सत्कारमिष्टेषु स्मरणं विश्वासगमनं च लक्षयेत्तुष्टस्य, विपरीतमतुष्टस्य ।१२। तं ब्रूयात् – 'दूतमुखा हि राजानः, त्वं चान्ये च ।१३। तस्मादुद्यतेष्वपि शस्त्रेषु यथोक्तं वक्तारो दूताः ।१४। तेषामन्तावसायिनोऽप्यवध्याः, किमङ्ग पुनर्ब्राह्मणाः ।१५। परस्यैतद् वाक्यम् ।१६। एष दूतधर्मः' इति ।१७।

वसेदविसृष्टः पूजया नोत्सिक्तः ।१८। परेषु बलित्वं न मन्येत ।१९। वाक्यमनिष्टं सहेत ।२०। स्त्रियः पानं च वर्जयेत् ।२१। एकः शयीत ।२२। सुप्तमत्तयोर्हि भावज्ञानं दृष्टम् ।२३।

कृत्यपक्षोपजापमकृत्यपक्षे गूढप्रणिधानं रागापरागौ भर्तरि रन्ध्रं च प्रकृतीनां तापसवैदेहकव्यञ्जनाभ्यामुपलभेत, तयोरन्तेवासिभिश्चिकित्सकपाषण्डव्यञ्जनोभयवेतनैर्वा ।२४। तेषामसंभाषायां याचकमत्तोन्मत्तसुप्तप्रलापैः पुण्यस्थानदेवगृहचित्रलेख्यसंज्ञाभिर्वा चारमुपलभेत ।२५। उपलब्धस्योपजापमुपेयात् ।२६।

परेण चोक्तः स्वासां प्रकृतीनां प्रमाणं नाचक्षीत ।२७। 'सर्वं वेद भवान्' इति ब्रूयात्, कार्यसिद्धिकरं वा ।२८।

कार्यस्यासिद्धावुपरुध्यमानस्तर्कयेत्—'किं भर्तुर्मे व्यसनमासन्नं पश्यन्, स्वं वा व्यसनं प्रतिकर्तुकामः, पार्ष्णिग्राहमासारमन्तःकोपमाटविकं वा समुत्थापयितुकामः, मित्रमाक्रन्दं वा व्याघातयितुकामः, स्वं वा परतो विग्रहमन्तःकोपमाटविकं वा प्रतिकर्तुकामः, संसिद्धं वा मे भर्तुर्यात्राकालमभिहन्तुकामः, सस्यपण्यकुप्यसंग्रहं दुर्गकर्म बलसमुद्दानं वा कर्तुकामः, स्वसैन्यानां वा व्यायामस्य देशकालावाकाङ्क्षमाणः, परिभवप्रमादाभ्यां वा, संसर्गानुबन्धार्थी वा, मामुपरुणद्धि' इति ।२९। ज्ञात्वा वसेदपसरेद्वा ।३०। प्रयोजनमिष्टमवेक्षेत वा ।३१।

शासनमनिष्टमुक्त्वा बन्धवधभयादविसृष्टोऽप्यपगच्छेत्, अन्यथा नियम्येत ।३२।

प्रेषणं सन्धिपालत्वं प्रतापो मित्रसंग्रहः ।
उपजापः सुहृद्भेदो गूढदण्डातिसारणम् ।।३३।।

बन्धुरत्नापहरणं चारज्ञानं पराक्रमः ।
समाधिमोक्षो दूतस्य कर्म योगस्य चाश्रयः ।।३४।।

स्वदूतैः कारयेदेतत्परदूतांश्च रक्षयेत् ।
प्रतिदूतापसर्पाभ्यां दृश्यादृश्यैश्च रक्षिभिः ।।३५।।

इति विनयाधिकारिके प्रथमेऽधिकरणे दूतप्रणिधिः षोडशोऽध्यायः ।।

१७

[त्रयोदशं प्रकरणम्——राजपुत्ररक्षणम्]

२००६ रक्षितो राजा राज्यं रक्षत्यासन्नेभ्यः परेभ्यश्च, पूर्वं दारेभ्यः पुत्रेभ्यश्च ।१। दार-रक्षणं निशान्तप्रणिधौ वक्ष्यामः ।२।

पुत्ररक्षणं तु ।३।

'जन्मप्रभृति राजपुत्रान् रक्षेत् ।४। कर्कटकसधर्माणो हि जनकभक्षा राजपुत्राः ।५। तेषामजातस्नेहे पितर्युपांशुदण्डः श्रेयान्' इति भारद्वाजः ।६।

'नृशंसमदुष्टवधः क्षत्रबीजविनाशश्च' इति विशालाक्षः ।७। 'तस्मादेकस्थानावरोधः श्रेयान्' इति ।८।

'अहिभयमेतद्' इति पाराशराः ।९। 'कुमारो हि "विक्रमभयान्मां पितावरुणद्धि" इति ज्ञात्वा तमेवाङ्के कुर्यात् ।१०। तस्मादन्तपालदुर्गे वासः श्रेयान्' इति ।११।

'औरभ्रं भयमेतद्' इति पिशुनः ।१२। 'प्रत्यापत्तेर्हि तदेव कारणं ज्ञात्वान्तपालसखः स्यात् ।१३। तस्मात्स्वविषयादपकृष्टे सामन्तदुर्गे वासः श्रेयान्' इति ।१४।

'वत्सस्थानमेतद्' इति कौणपदन्तः ।१५। 'वत्सेनेव हि धेनुं पितरमस्य सामन्तो दुह्यात् ।१६। तस्मान्मातृबन्धुषु वासः श्रेयान्' इति ।१७।

'ध्वजस्थानमेतद्' इति वातव्याधिः ।१८। 'तेन हि ध्वजेनादितिकौशिकवदस्य मातृबान्धवा भिक्षेरन् ।१९। तस्माद् ग्राम्यसुखेष्वेनमवसृजेत् ।२०। सुखोपरुद्धा हि पुत्राः पितरं नाभिद्रुह्यन्ति' इति ।२१।

जीवन्मरणमेतदिति कौटिल्यः ।२२। काष्ठमिव हि घुणजग्धं राजकुलमविनीतपुत्रमभियुक्तमात्रं भज्येत ।२३। तस्मादृतुमत्यां महिष्यामृत्विजश्चरुमैन्द्राबार्हस्पत्यं निर्वपेयुः ।२४। आपन्नसत्त्वायाः कौमारभृत्यो गर्भभर्मणि प्रसवे च वियतेत ।२५। प्रजातायाः पुत्रसंस्कारं पुरोहितः कुर्यात् ।२६। समर्थं तद्विदो विनयेयुः ।२७।

'सत्त्रिणामेकश्चैनं मृगयाद्यूतमद्यस्त्रीभिः प्रलोभयेत् "पितरि विक्रम्य राज्यं गृहाण" इति ।२८। तमन्यः सत्त्री प्रतिषेधयेत्' इत्याम्भीयाः ।२९।

महादोषमबुद्धबोधनमिति कौटिल्यः ।३०। नवं हि द्रव्यं येन येनार्थजातेनोपदिह्यते तत्तदाचूषति ।३१। एवमयं नवबुद्धिर्यद्यदुच्यते तत्तच्छास्त्रोपदेशमिवाभिजानाति ।३२। तस्माद्धर्म्यमर्थ्यं चास्योपदिशेन्नाधर्म्यमनर्थ्यं च ।३३।

सत्त्रिणस्त्वेनं 'तव स्मः' इति वदन्तः पालयेयुः ।३४। यौवनोत्सेकात्परस्त्रीषु मनः कुर्वाणमार्याव्यञ्जनाभिः स्त्रीभिरमेध्याभिः शून्यागारेषु रात्रावुद्वेजयेयुः ।३५। मद्यकामं योगपानेनोद्वेजयेयुः ।३६। द्यूतकामं कापटिकैरुद्वेजयेयुः ।३७। मृगयाकामं प्रतिरोधकव्यञ्जनैस्त्रासयेयुः ।३८। पितरि विक्रमबुद्धिं 'तथा' इत्यनुप्रविश्य भेदयेयुः

— 'अप्रार्थनीयो राजा, विपन्ने घातः, संपन्ने नरकपातः, संक्रोशः, प्रजाभिरेकलोष्टवधश्च' इति ।३९।

विरागं वेदयेयुः ।४०। प्रियमेकपुत्रं बध्नीयात् ।४१। बहुपुत्रः प्रत्यन्तमन्यविषयं वा प्रेषयेद् यत्र गर्भः पण्यं डिम्बो वा न भवेत् ।४२। आत्मसंपन्नं सैनापत्ये यौवराज्ये वा स्थापयेत् ।४३।

बुद्धिमानाहार्यबुद्धिर्दुर्बुद्धिरिति पुत्रविशेषाः ।४४। शिष्यमाणो धर्मार्थावुपलभते चानुतिष्ठति च बुद्धिमान् ।४५। उपलभमानो नानुतिष्ठत्याहार्यबुद्धिः ।४६। अपायनित्यो धर्मार्थद्वेषी चेति दुर्बुद्धिः ।४७।

स यद्येकपुत्रः पुत्रोत्पत्तावस्य प्रयतेत ।४८। पुत्रिकापुत्रानुत्पादयेद्वा ।४९।

वृद्धस्तु व्याधितो वा राजा मातृबन्धुकुल्यगुणवत्सामन्तानामन्यतमेन क्षेत्रे बीजमुत्पादयेत् ।५०। न चैकपुत्रमविनीतं राज्ये स्थापयेत् ।५१।

बहूनामेकसंरोधः पिता पुत्रहितो भवेत् ।
अन्यत्रापद ऐश्वर्यं ज्येष्ठभागि तु पूज्यते ।।५२।।
कुलस्य वा भवेद्राज्यं कुलसंघो हि दुर्जयः ।
अराजव्यसनाबाधः शश्वदावसति क्षितिम् ।।५३।।

इति विनयाधिकारिके प्रथमेऽधिकरणे राजपुत्ररक्षणं सप्तदशोऽध्यायः ।।

१८

[चतुर्दशं प्रकरणम्—अपरुद्धवृत्तम्; पञ्चदशं प्रकरणम्—अपरुद्धे वृत्तिः]

विनीतो राजपुत्रः कृच्छ्रवृत्तिरसदृशे कर्मणि नियुक्तः पितरमनुवर्तेत, अन्यत्र प्राणाबाधकप्रकृतिकोपकपातकेभ्यः ।१।

पुण्ये कर्मणि नियुक्तः पुरुषमधिष्ठातारं याचेत ।२। पुरुषाधिष्ठितश्च सविशेषमादेशमनुतिष्ठेत् ।३। अभिरूपं च कर्मफलमौपायनिकं च लाभं पितुरुपनाययेत् ।४।

तथाप्यतुष्यन्तमन्यस्मिन्पुत्रे दारेषु वा स्निह्यन्तमरण्यायापृच्छेत ।५। बन्धवधभयाद्वा यः सामन्तो न्यायवृत्तिर्धार्मिकः सत्यवागविसंवादकः प्रतिग्रहीता मानयिता चाभिपन्नानां तमाश्रयेत ।६। तत्रस्थः कोशदण्डसंपन्नः प्रवीरपुरुषकन्यासंबन्धमटवीसंबन्धं कृत्यपक्षोपग्रहं च कुर्यात् ।७।

एकचरः सुवर्णपाकमणिरागहेमरूप्यपण्याकरकर्मान्तानाजीवेत् ।८। पाषण्डसंघद्रव्यमश्रोत्रियोपभोग्यं वा देवद्रव्यमाढ्यविधवाद्रव्यं वा गूढमनुप्रविश्य सार्थयानपात्राणि च मदनरसयोगेनातिसंधायापहरेत् ।९। पारग्रामिकं वा योगमातिष्ठेत् ।१०। मातुः परिजनोपग्रहेण वा चेष्टेत ।११। कारुशिल्पिकुशीलवचिकित्सकवाग्जीवन-

२५ मिनिट

पाषण्डच्छद्मभिर्वा नष्टरूपस्तद्वयञ्जनसखश्छिद्रेषु प्रविश्य राज्ञः शस्त्ररसाभ्यां प्रहृत्य ब्रूयात् – 'अहमसौ कुमारः, सहभोग्यमिदं राज्यम्, एको नार्हति भोक्तुम्, ये कामयन्ते मां भर्तुं तानहं द्विगुणेन भक्तवेतनेनोपस्थास्यामि' इति।१२। इत्यपरुद्धवृत्तम्।

अपरुद्धं तु मुख्यपुत्रासर्पाः प्रतिपाद्यानयेयुः, माता वा प्रतिगृहीता।१३। त्यक्तं गूढपुरुषाः शस्त्ररसाभ्यां हन्युः।१४। अत्यक्तं तुल्यशीलाभिः स्त्रीभिः पानेन मृगयया वा प्रसञ्जयित्वा रात्रावुपगृह्यानयेयुः।१५।

उपस्थितं च राज्येन मदूर्ध्वमिति सान्त्वयेत्।
एकस्थमथ संरुन्ध्यात् पुत्रवांस्तु प्रवासयेत्॥१६॥

इति विनयाधिकारिके प्रथमेऽधिकरणे अपरुद्धवृत्तम् अपरुद्धे च वृत्तिः अष्टादशोऽध्यायः।

१९

[षोडशं प्रकरणम् — राजप्रणिधिः]

राजानमुत्थितमनूत्तिष्ठन्ते भृत्याः।१। प्रमाद्यन्तमनुप्रमाद्यन्ति।२। कर्माणि चास्य भक्षयन्ति।३। द्विषद्भिश्चातिसंधीयते।४। तस्मादुत्थानमात्मनः कुर्वीत।५।

नालिकाभिरहरष्टधा रात्रिं च विभजेत्, छायाप्रमाणेन वा।६। त्रिपौरुषी पौरुषी चतुरङ्गुला नष्टच्छायो मध्याह्न इति चत्वारः पूर्वे दिवसस्याष्टभागाः।७। तैः पश्चिमा व्याख्याताः।८।

तत्र पूर्वे दिवसस्याष्टभागे रक्षाविधानमायव्ययौ च शृणुयात्।९। द्वितीये पौरजानपदानां कार्याणि पश्येत्।१०। तृतीये स्नानभोजनं सेवेत, स्वाध्यायं च कुर्वीत।११। चतुर्थे हिरण्यप्रतिग्रहमध्यक्षांश्च कुर्वीत।१२। पञ्चमे मन्त्रिपरिषदा पत्रसंप्रेषणेन मन्त्रयेत, चारगुह्यबोधनीयानि च बुध्येत।१३। षष्ठे स्वैरविहारं मन्त्रं वा सेवेत।१४। सप्तमे हस्त्यश्वरथायुधीयान् पश्येत्।१५। अष्टमे सेनापतिसखो विक्रमं चिन्तयेत्।१६। प्रतिष्ठितेऽहनि सन्ध्यामुपासीत।१७।

प्रथमे रात्रिभागे गूढपुरुषान् पश्येत्।१८। द्वितीये स्नानभोजनं कुर्वीत, स्वाध्यायं च।१९। तृतीये तूर्यघोषेण संविष्टश्चतुर्थपञ्चमौ शयीत।२०। षष्ठे तूर्यघोषेण प्रतिबुद्धः शास्त्रमितिकर्तव्यतां च चिन्तयेत्।२१। सप्तमे मन्त्रमध्यासीत, गूढपुरुषांश्च प्रेषयेत्।२२। अष्टमे ऋत्विगाचार्यपुरोहितस्वस्त्ययनानि प्रतिगृह्णीयात्, चिकित्सकमाहानसिकमौहूर्तिकांश्च पश्येत्।२३। सवत्सां धेनुं वृषभं च प्रदक्षिणीकृत्योपस्थानं गच्छेत्।२४।

आत्मबलानुकूल्येन वा निशाहर्भागान् प्रविभज्य कार्याणि सेवेत।२५।

उपस्थानगतः कार्यार्थिनामद्वारासङ्गं कारयेत्।२६। दुर्दर्शो हि राजा कार्याकार्य-

Scanned with CamScanner

विपर्यासमासन्नैः कार्यते ।२७। तेन प्रकृतिकोपमरिवशं वा गच्छेत् ।२८। तस्माद्देवताश्रमपाषण्डश्रोत्रियपशुपुण्यस्थानानां बालवृद्धव्याधितव्यसन्यनाथानां स्त्रीणां च क्रमेण कार्याणि पश्येत्, कार्यगौरवाद् आत्ययिकवशेन वा ।२९।

सर्वमात्ययिकं कार्यं शृणुयान्नातिपातयेत् ।
कृच्छ्रसाध्यमतिक्रान्तमसाध्यं वाऽपि जायते ।।३०।।
अग्न्यगारगतः कार्यं पश्येद्वैद्यतपस्विनाम् ।
पुरोहिताचार्यसखः प्रत्युत्थायाभिवाद्य च ।।३१।।
तपस्विनां तु कार्याणि त्रैविद्यैः सह कारयेत् ।
मायायोगविदां चैव न स्वयं कोपकारणात् ।।३२।।
राज्ञो हि व्रतमुत्थानं यज्ञः कार्यानुशासनम् ।
दक्षिणा वृत्तिसाम्यं तु दीक्षा तस्याभिषेचनम् ।।३३।।
प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम् ।
नात्मप्रियं हितं राज्ञः प्रजानां तु प्रियं हितम् ।।३४।।
तस्मान्नित्योत्थितो राजा कुर्यादर्थानुशासनम् ।
अर्थस्य मूलमुत्थानमनर्थस्य विपर्ययः ।।३५।।
अनुत्थाने ध्रुवो नाशः प्राप्तस्यानागतस्य च ।
प्राप्यते फलमुत्थानाल्लभते चार्थसंपदम् ।।३६।।

इति विनयाधिकारिके प्रथमेऽधिकरणे राजप्रणिधिः एकोनविंशोऽध्यायः ।।

२०

[सप्तदशं प्रकरणम् — निशान्तप्रणिधिः]

वास्तुकप्रशस्ते देशे सप्राकारपरिखाद्वारमनेककक्ष्यापरिगतमन्तःपुरं कारयेत् ।१।

कोशगृहविधानेन मध्ये वासगृहम्, गूढभित्तिसंचारं मोहनगृहं तन्मध्ये वा वासगृहम्, भूमिगृहं वासन्नचैत्यकाष्ठदेवतापिधानद्वारमनेकसुरुङ्गासंचारं तस्योपरि प्रासादं गूढभित्तिसोपानं सुषिरस्तम्भप्रवेशापसारं वा वासगृहं यन्त्रबद्धतलावपातं कारयेत्, आपत्प्रतीकारार्थमापदि वा ।२। अतोऽन्यथा वा विकल्पयेत्, सहाध्यायिभयात् ।३।

मानुषेणाग्निना त्रिरपसव्यं परिगतमन्तःपुरमग्निरन्यो न दहति, न चात्रान्योऽग्निर्ज्वलति, वैद्युतेन भस्मना मृत्संयुक्तेन करकवारिणावलिप्तं च ।४।

जीवन्तीश्वेतामुष्ककपुष्पवन्दाकाभिरक्षीवे जातस्याश्वत्थस्य प्रतानेन गुप्तं सर्पा विषाणि वा न प्रभवन्ति ।५। मयूरनकुलपृषतोत्सर्गः सर्पान् भक्षयति ।६। शुकः

सारिका भृङ्गराजो वा सर्पविषशङ्कायां क्रोशति ।७। क्रौञ्चो विषाभ्याशे माद्यति, ग्लायति जीवंजीवकः, म्रियते मत्तकोकिलः, चकोरस्याक्षिणी विरज्येते ।८।

इत्येवमग्निविषसर्पेभ्यः प्रतिकुर्वीत ।९।

पृष्ठतः कक्ष्याविभागे स्त्रीनिवेशो गर्भव्याधिसंस्था वृक्षोदकस्थानं च ।१०। वहिः कन्याकुमारपुरम् ।११। पुरस्तादलङ्कारभूमिर्मन्त्रभूमिरुपस्थानं कुमाराध्यक्षस्थानं च ।१२। कक्ष्यान्तरेष्वन्तर्वंशिकसैन्यं तिष्ठेत् ।१३।

अन्तर्गृहगतः स्थविरस्त्रीपरिशुद्धां देवीं पश्येत् ।१४। देवीगृहे लीनो हि भ्राता भद्रसेनं जघान, मातुः शय्यान्तर्गतश्च पुत्रः कारूषम् ।१५। लाजान्मधुनेति विषेण पर्यस्य देवी काशिराजम्, विषदिग्धेन नूपुरेण वैरन्त्यम्, मेखलामणिना सौवीरम्, जालूथमादर्शेन, वेण्यां गूढं शस्त्रं कृत्वा देवी विदूरथं जघान ।१६। तस्मादेतान्यास्पदानि परिहरेत् ।१७।

मुण्डजटिलकुहकप्रतिसंसर्गं वाह्याभिश्च दासीभिः प्रतिषेधयेत् ।१८। न चैनाः कुल्याः पश्येयुः, अन्यत्र गर्भव्याधिसंस्थाभ्यः ।१९। रूपाजीवाः स्नानप्रघर्षशुद्धशरीराः परिवर्तितवस्त्रालङ्काराः पश्येयुः ।२०। अशीतिकाः पुरुषाः पञ्चाशत्काः स्त्रियो वा मातापितृव्यञ्जनाः स्थविरवर्षधराभ्यागारिकाश्चावरोधानां शौचाशौचं विद्युः, स्थापयेयश्च स्वामिहिते ।२१।

स्वभूमौ च वसेत्सर्वः परभूमौ न संचरेत् ।
न च वाह्येन संसर्गं कश्चिदाभ्यन्तरो व्रजेत् ।।२२।।
सर्वं चावेक्षितं द्रव्यं निवद्धागमनिर्गमम् ।
निर्गच्छेदभिगच्छेद्वा मुद्रासंक्रान्तभूमिकम् ।।२३।।

इति विनयाधिकारिके प्रथमेऽधिकरणे निशान्तप्रणिधिः विंशोऽध्यायः ।।

२१

[अष्टादशं प्रकरणम् — आत्मरक्षितकम्]

शयनादुत्थितः स्त्रीगणैर्धन्विभिः परिगृह्येत, द्वितीयस्यां कक्ष्यायां कञ्चुकोष्णीषिभिर्वर्षधराभ्यागारिकैः, तृतीयस्यां कुब्जवामनकिरातैः, चतुर्थ्यां मन्त्रिभिः संवन्धिभिर्दौवारिकैश्च प्रासपाणिभिः ।१।

पितृपैतामहं संवन्धानुवद्धं शिक्षितमनुरक्तं कृतकर्माणं च जनमासन्नं कुर्वीत, नान्यतोदेशीयमकृतार्थमानं स्वदेशीयं वाप्यपकृत्योपगृहीतम् ।२। अन्तर्वंशिकसैन्यं राजानमन्तःपुरं च रक्षेत् ।३।

गुप्ते देशे माहानसिकः सर्वमास्वादबाहुल्येन कर्म कारयेत् ।४। तद्राजा तथैव प्रतिभुञ्जीत पूर्वमग्नये वयोभ्यश्च बलिं कृत्वा ।५।

अग्नेर्ज्वालाधूमनीलता शब्दस्फोटनं च विषयुक्तस्य, वयसां विपत्तिश्च ।६। अन्नस्य ऊष्मा मयूरग्रीवाभः शैत्यम् आशु क्लिष्टस्येव वैवर्ण्यं सोदकत्वमक्लिन्नत्वं च, व्यञ्जनानाम् आशु शुष्कत्वं च क्वाथध्यामफेनपटलविच्छिन्नभावो गन्धस्पर्शरसवधश्च, द्रवेषु हीनातिरिक्तच्छायादर्शनं फेनपटलसीमन्तोर्ध्वराजीदर्शनं च, रसस्य मध्ये नीला राजी, पयसस्ताम्रा, मद्यतोययोः काली, दध्नः श्यामा, मधुनः श्वेता, द्रव्याणामार्द्राणाम् आशु प्रम्लानत्वमुत्पक्वभावः क्वाथनीलश्यावता च, शुष्काणाम् आशु शातनं वैवर्ण्यं च, कठिनानां मृदुत्वं मृदूनां च कठिनत्वम्, तदभ्याशे क्षुद्रसत्त्ववधश्च, आस्तरणप्रावरणानां ध्याममण्डलता तन्तुरोमपक्ष्मशातनं च, लोहमणिमयानां पङ्कमलोपदेहता स्नेहरागगौरवप्रभाववर्णस्पर्शवधश्च – इति विषयुक्तस्य लिङ्गानि ।७।

विषप्रदस्य तु शुष्कश्यावववक्त्रता वाक्सङ्गः स्वेदो विजृम्भणं चातिमात्रं वेपथुः प्रस्खलनं वाक्यविप्रेक्षणम् आवेगः कर्मणि स्वभूमौ चानवस्थानम् इति ।८।

तस्मादस्य जाङ्गुलीविदो भिषजश्चासन्नाः स्युः ।९। भिषग्भैषज्यागारादास्वादविशुद्धमौषधं गृहीत्वा पाचकपेषकाभ्यामात्मना च प्रतिस्वाद्य राज्ञे प्रयच्छेत् ।१०। पानं पानीयं चौषधेन व्याख्यातम् ।११।

कल्पकप्रसाधकाः स्नानशुद्धवस्त्रहस्ताः समुद्रमुपकरणमन्तर्वंशिकहस्तादादाय परिचरेयुः ।१२। स्नापकसंवाहकास्तरकरजकमालाकारकर्म दास्यः प्रसिद्धशौचाः कुर्युः, ताभिरधिष्ठिता वा शिल्पिनः ।१३। आत्मचक्षुषि निवेश्य वस्त्रमाल्यं दद्युः, स्नानानुलेपनप्रघर्षचूर्णवासस्नानीयानि च स्ववक्षोबाहुषु च ।१४। एतेन परस्मादागतकं व्याख्यातम् ।१५।

कुशीलवाः शस्त्राग्निरसक्रीडावर्जं नर्मयेयुः ।१६। आतोद्यानि चैषामन्तस्तिष्ठेयुः, अश्वरथद्विपालङ्काराश्च ।१७।

आप्तपुरुषाधिष्ठितं यानवाहनमारोहेत्, नावं चाप्तनाविकाधिष्ठिताम् ।१८। अन्यनौप्रतिबद्धां वातवेगवशां च नोपेयात् ।१९। उदकान्ते सैन्यमासीत ।२०।

मत्स्यग्राहविशुद्धमुदकमवगाहेत ।२१। व्यालग्राहविशुद्धमुद्यानं गच्छेत् ।२२।

लुब्धकश्वगणिभिरपास्तस्तेनव्यालपराबाधभयं चललक्ष्यपरिचयार्थं मृगारण्यं गच्छेत् ।२३।

आप्तशस्त्रग्राहाधिष्ठितः सिद्धतापसं पश्येत्, मन्त्रिपरिषदा सह सामन्तदूतम् ।२४। संनद्धोऽश्वं हस्तिनं रथं वारूढः संनद्धमनीकं पश्येत् ।२५।

निर्याणेऽभियाने च राजमार्गमुभयतः कृतारक्षं शस्त्रिभिर्दण्डिभिश्चापास्तशस्त्र-

हस्तप्रव्रजितव्यङ्गं गच्छेत् ।२६। न पुरुषसंवाधमवगाहेत ।२७। यात्रासमाजोत्सव-प्रहवणानि च दशवर्गिकाधिष्ठितानि गच्छेत् ।२८।

यथा च योगपुरुषैरन्यान् राजाधितिष्ठति ।
तथायमन्याबाधेभ्यो रक्षेदात्मानमात्मवान् ।।२९।।

इति विनयाधिकारिके प्रथमेऽधिकरणे आत्मरक्षितकम् एकविंशोऽध्यायः।

एतावता कौटिलीयस्यार्थशास्त्रस्य विनयाधिकारिकम्
प्रथममधिकरणं समाप्तम् ।।